महाविद्यालय का नाम - आ. वि. हि. म. वि. रहीमपुर खगड़िया।

दिनाङ्क 5.5.2020

शास्त्री प्रतिष्ठा प्रथम खण्ड
साहित्य (अनिवार्य व्याकरण)

विषय - अव्ययीभाव समासस्य उदाहरणम्

भूतपूर्वः → अत्र "~~पूर्वम् भूतः~~" "पूर्वं भूतः" इति लौकिक विग्रहे, "पूर्व अम् भूत सु" इत्य लौकिक विग्रहे, 'सह सुपा' इत्यनेन विभाषा समास संज्ञायां समासत्वात् प्रातिपदिकत्वेन 'सुपो धातु - इति सुपो - "विभक्त्योः" लुकि, भूतपूर्वे चरट् - इति निर्देशेन भूतशब्दस्य पूर्वनिपाते, एकदेशविकृत-न्यायेन प्रातिपदिकत्वात् सौ तस्य रुत्व विसर्गौ भूतपूर्वः इति

समास प्रकरणम्

आदौ केवलसमासः

समासः पञ्चधा। तत्र समसनं समासः।
स च विशेष-संज्ञा विनिर्मुक्तः केवल समासः प्रथमः। प्रायेण पूर्वपदार्थ प्रधानोऽव्ययी भावो द्वितीयः। प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः तृतीयः

February 2020

| WK | M | T | W | T | F | S | S |
|---|---|---|---|---|---|---|---|
| 05 | | | | | | 1 | 2 |
| 06 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| 07 | 10 | 11 | 12 | 13 | 14 | 15 | 16 |
| 08 | 17 | 18 | 19 | 20 | 21 | 22 | 23 |
| 09 | 24 | 25 | 26 | 27 | 28 | 29 | |

2020 Tuesday January **07**

007-359 • WK 02

तत्पुरुष भेदः कर्मधारयः कर्मधारय भेदो द्विगुः
प्रायेणान्य पदार्थ प्रधानो बहुव्रीहिश्चतुर्थः प्रायेणोभय-
~~पदार्थ~~ पदार्थ प्रधानो द्वन्द्वः पञ्चमः ।

समर्थः पदविधिः — पद सम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः ।

प्राक्कडारात् समासः — कडाराः कर्मधारये इत्यतः प्राक् समासः इत्यधिक्रियते ।

अव्ययीभावे चाकाले

सहस्य सः स्यादव्ययीभावे न तु काले हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां सम्पत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थ-पर्यन्तमधीते साग्नि ।

नदीभिश्च → नदीभिः सह संख्या समस्यते । "समाहारे चायमिष्यते" पञ्चगङ्गम्

"तद्धिताः" — आ पञ्चम् समाप्तेरधिकारोऽयं ।

दिनेश प्र० सिंह
एसोसिएट प्रोफेसर (व्याकरण)

NOTES